**अधिकरणिक** पु० अधिकरणम् धर्म्माधिकरणम् आश्रयतयाऽस्त्यस्य ठन् । विचारकरणाय धर्म्माधिकरणमण्डपे नियुक्ते प्राड्विवाकादौ । तत्र नियुक्तः ठक् । आधिकरणिकोऽप्यत्र पु० ।

**अधिकर्म्म(न्)** अव्य० कर्म्मणि विभक्त्यर्थेऽव्ययी० वा अच्समा० । कर्म्माधिकृत्येत्यर्थे । अधिकं कर्म्म प्रा० स० । अधिककर्म्मणि । न० ब० । अधिककर्म्मयुक्ते त्रि० ।

**अधिकर्म्मकर** त्रि० अधिकं कर्म्म तत्करोति कृ—आनुलोम्यादौ ट । शुश्रूषकभेदे दासभेदे । क्विप् अधिकर्मकृदप्यत्र त्रि० ।

**अधिकर्म्मकृत** त्रि० अधिकं कर्म अधिकर्म तत् कृतं येन निष्ठान्तस्य परनि० । "सर्वेष्वधिकृतो यः स्यात् कुटुम्बस्य तथोपरि । सोऽधिकर्मकृतो ज्ञेय" इति स्मृत्युक्ते शुश्रूषकभेदे ।

**अधिकर्म्मिक** पु० अधिकृत्य हट्टं कर्मणेऽलम् अधिकर्म—ठन् । हट्टाध्यक्षे, हट्टस्थवणिग्भ्यः शुल्कादानकर्म्मणि नियुक्ते ।

**अधिकाङ्ग** न० अधिकोऽङ्गात् । वर्मधरैर्योधैर्हृदयमध्ये वर्मदार्ढ्यार्थं बद्धपट्टिकादौ । ब० । अधिकाङ्गवति त्रि० । "अजाविघातने चैव अधिकाङ्गः प्रजायते" इति शाता० ।

**अधिकार** पु० अधि+कृ—घञ् । आरम्भे, यथेष्टं क्रयविक्रयादिकर्तृत्वसम्पादके स्वामित्वे, "अधिकारः फले स्वाम्यमधिकारी प्रभुर्भवेदिति" मीमांसोक्ते विहितकर्म्मफलस्वामित्वे, विनियोज्यपुरुषस्य सम्बन्धे, यथा याजनादिकर्मणि ब्राह्मणादेः, राज्ञां प्रजापालनादौ, वैश्यस्य कृष्यादौ, शूद्रस्य द्विजसेवायाम्, "नैमित्तिकोऽयं प्रायश्चित्ताधिकार" इति मिताक्षरा । स्वामित्वे—"सर्व्वे स्युरधिकारिण" इति स्मृतिः । तत्र च वैदिकादिकर्मसु कर्त्तव्यताज्ञानाधीनप्रवृत्तिहेतुरधिकारः । यथा याजनादौ ब्राह्मणस्येत्यादि । शूद्रस्य नाध्ययनादिष्वधिकारः यथोक्तं "निषेकादिश्मशानान्तो यस्य वेदोदितो विधिः । तस्य शास्त्रेऽधिकारोऽस्मिन्नान्यस्यैव कदाचनेति" मनुना । न केवलम् अध्ययने शूद्राणामधिकारः यागादावप्यनधिकारः यथोक्तं जैमिनीयसूत्रभाष्यादौ । "चातुर्वर्ण्यमविशेषात्" इत्याशङ्क्य "निर्द्देशाद्वा त्रयाणां स्यादग्न्याधेये ह्यसम्बन्धः क्रतुषु ब्राह्मणश्रुतिरित्यात्रेय" इति । "वाशब्दः पक्षं व्यावर्त्तयति, "त्रयाणाम्" अधिकारः स्यात् कुतः ? अग्न्याधेये निर्द्देशात् अग्न्याधेये त्रयाणां निर्द्देशो भवति, "वसन्ते ब्राह्मणोऽग्निमादधीत, ग्रीष्मे राजन्यः, शरदि वैश्यः" इति शूद्रस्य आधाने श्रुतिर्नास्ति इत्यनग्निः शूद्रः असमर्थोऽग्निहोत्रादि निर्वर्त्तयितुम् । तस्मात् "अग्निहोत्रं जुहुयात् स्वर्गकामः" इत्येवमादिषु शूद्रस्य प्रापिका श्रुतिर्नास्ति । ब्राह्मणादीन् एवाधिकृत्य सा प्रवर्त्तते, ते हि समर्था अग्निमत्त्वात्, आहवनीयादयो न शूद्रस्य, अविधानात्, संस्कारशब्दत्वाच्च आहवनीयादीनाम् । तस्मात् अनधिकृतोऽग्निहोत्रादिषु शूद्रः इत्यात्रेयः मन्यते स्म" इति भा० । तथा कर्मप्रतिपादक सर्वशास्त्रविहितकर्मसु मनुष्याणामेवाधिकारः न तिरश्चां न वा देवादीनां यथोक्तं तत्रैव "फलार्थत्वात् कर्मणः शास्त्रं सर्वाधिकारं स्यात्" इत्याशङ्क्य "कर्त्तुर्वा श्रुतिसंयोगाद्विधिः कात्स्न्र्येन गम्यते" इति सू० "वाशब्दः पक्षं व्यावर्त्तयति । न चैतदस्ति तिर्यगादीनामपि अधिकारः इति । कस्य तर्हि ? । यः समर्थः कृत्स्नं कर्म अभिनिर्वर्त्तयितुम् । न चैते, शक्नुवन्ति तिर्यगादयः कृत्स्नं कर्म्माभिनिर्वर्त्तयितुम्, तस्मात् एषां न सुखस्याभ्युपायः कर्म, कथं यो न शक्यते कर्त्तुम्, सोऽभ्युपायः स्यात् ? इति । न देवानां, देवतान्तराभावात्- न हि आत्मानम् उद्दिश्य त्यागः सम्भवति, त्याग एवासौ न स्यात्, न ऋषीणाम्, आर्षेयाभावात् न भृग्वादयो भृग्वादिभिः सगोत्रा भवन्ति, न चैषां सामर्थ्यं प्रत्यक्षम् । "अपि च तिर्य्यञ्चो न कालान्तरफलेन अर्थिनः, आसन्नं हि कामयन्ते । "ननु च उक्तं, कालान्तरफलार्थिनः तिरश्चः पश्यामः, शुनः श्येनांश्चतुर्द्दश्याम् अष्टमम्यां च उपवसतः:" इति उच्यते न जन्मान्तरफलार्थिन उपवसन्ति । 'कथं' अवगम्यते ? वेदाध्ययनाभावात्, ये वेदमधीयते ते एतद्विदुः, "इदं कर्म कृत्वा, इदं फलममुत्र प्राप्नोति इति" न चैते वेदमधीयते, नापि स्मृतिशास्त्राणि, नाप्यन्येभ्यः अवगच्छन्ति, तस्मात् न विदन्ति धर्मम् । अविद्वांसः कथम् अनुतिष्ठेयुः, तस्मात् न धर्म्माय उपवसन्ति इति । किमर्थश्च तर्ह्येषाम् उपवासः ? । उच्यते, रोगात् अरुचिरेषाम् । कथं पुनर्नियते काले रोगो भवति ? । उच्यते नियतकाला अपि रोगा भवन्ति यथा तृतीयकचातुर्थकाद्येति । तस्मात् मनुष्याणाम् अधिकारः इति । न च तिरश्चां द्रव्यपरिग्रहः, न हि एते द्रव्यं स्वेच्छया उपयुञ्जाना दृश्यन्ते, तस्मात् अनीशाना धनस्य । यत्तु, देवग्रामो हस्तिग्रामः इति, उपचारमात्रं तत् । तस्मात् अपि न तिरश्चाम् अधिकारः इति । यानि पुनर्लिङ्गानि, "देवा वै सत्रमासत" इत्येवमादीनि, अर्थवादाः ते विधिप्ररोचनार्थाः । विद्यते हि विधिरन्यः तेषु सर्वेषु,